Adda247
GET IT ON Google Play

This Booklet contains **16** printed pages.
এই প্রশ্নপত্রে **16** মুদ্রিত পৃষ্ঠা আছে।

**AF17—XVIII**

**Question Booklet No.**
প্রশ্ন-পুস্তিকা সংখ্যা

# EXAMINATION—STPGT

## SUBJECT : SANSKRIT

Do not open this Question Booklet until you are asked to do so.
এই প্রশ্নপত্র যতক্ষণ খুলতে না বলা হবে ততক্ষণ পর্যন্ত খুলবেন না।

Read carefully all the instructions given at the back page and on the front page of this Question Booklet.
এই প্রশ্নপত্রের শেষ পৃষ্ঠা ও প্রথম পৃষ্ঠায় দেওয়া সমস্ত নির্দেশাবলী মনোযোগ সহকারে পড়ুন।

### *Instructions for Candidates*

1. Use **Black Ballpoint Pen only** for writing particulars of this Question Booklet and marking responses on the OMR Answer Sheet.
2. This test is of **2 hours** and **30 minutes** duration and consists of **150** MCQ-type questions. Each question carries 1 mark.
3. There is no negative marking for any wrong answer.
4. Rough work should be done only in the space provided in the Question Booklet.
5. The answers are to be marked on the OMR Answer Sheet only. Mark your responses carefully since there is no chance of alteration/correction.
6. Use of eraser or whitener is strictly prohibited.

### *পরীক্ষার্থীদের জন্য নির্দেশাবলী*

1. এই প্রশ্নপত্রে লেখার জন্য এবং OMR উত্তরপত্রে উত্তর চিহ্নিত করতে **শুধুমাত্র কালো কালির বলপয়েন্ট কলম** ব্যবহার করুন।
2. এই পরীক্ষার সময় **2 ঘণ্টা 30 মিনিট**। পরীক্ষায় মোট **150** টি MCQ ধরনের প্রশ্ন থাকবে। প্রতি প্রশ্নের মূল্যাঙ্ক 1 হবে।
3. ভুল উত্তরের জন্য কোনো ঋণাত্মক নম্বর থাকবে না।
4. পরীক্ষার্থীকে রাফ ওয়ার্ক করতে হবে শুধুমাত্র কোশ্চেন বুকলেটে (প্রশ্নপত্রে) নির্দিষ্ট করা স্থানে।
5. প্রশ্নের উত্তর শুধুমাত্র OMR উত্তরপত্রে চিহ্নিত করতে হবে। উত্তর চিহ্নিত করার বিষয়ে পরীক্ষার্থীকে সর্বোচ্চ সতর্কতা অবলম্বন করতে হবে। প্রশ্নের উত্তর একবার চিহ্নিত করা হয়ে গেলে কোনো অবস্থাতেই তাকে পরিবর্তন বা সংশোধন করা যাবে না।
6. কালি-মোচনীয় ইরেজার বা সাদা তরল-জাতীয় বস্তুর ব্যবহার সম্পূর্ণরূপে নিষিদ্ধ।

Name of the Candidate (in Capitals) : ____________________
পরীক্ষার্থীর নাম (বড় অক্ষরে)

Roll No. : ____________________
রোল নং

OMR Answer Sheet No. ____________________
OMR উত্তরপত্রের নম্বর

*Full Signature of the Candidate with date*
*পরীক্ষার্থীর সম্পূর্ণ স্বাক্ষর তারিখসহ*

*Signature of the Invigilator with date*
*নিরীক্ষকের স্বাক্ষর তারিখসহ*



Adda247

# Test Prime

## ALL EXAMS, ONE SUBSCRIPTION

**70,000+** Mock Tests

Personalised Report Card

Unlimited Re-Attempt

**600+** Exam Covered

Previous Year Papers

**500%** Refund

IBPS

NABARD

INDIAN RAILWAYS

**ATTEMPT FREE MOCK NOW**

Adda247 GET IT ON Google Play

**सूचना**—अस्मिन् प्रश्नपत्रे **पञ्चाशदधिकं शतं (150)** बहुवैकल्पिकाः प्रश्नाः सन्ति। प्रत्येकं प्रश्नस्य एकः अङ्कः वर्तते। **सर्वे** प्रश्नाः समाधेयाः।

**1.** माहेश्वरसूत्रेषु कति इत्वर्णाः वर्तन्ते?
(A) चतुर्दश
(B) पञ्चदश
(C) त्रयोदश
(D) एकादश

**2.** 'दिवेदिवे' इति पदस्य अर्थः किम्?
(A) रात्रावहनि
(B) प्रतिदिनम्
(C) हिंसारहितम्
(D) न किमपि

**3.** तर्कसंग्रहानुसारं कर्मणः विभागाः कति?
(A) सप्त
(B) नव
(C) पञ्च
(D) चत्वारः

**4.** 'चरकसंहिता' कतिभिः स्थानैः विभक्ता?
(A) पञ्चभिः
(B) अष्टाभिः
(C) नवभिः
(D) सप्तभिः

**5.** 'क' इति वर्णः अधोलिखितेषु कस्मिन् प्रत्याहारे वर्तते?
(A) चर्-प्रत्याहारे
(B) शर्-प्रत्याहारे
(C) अक्-प्रत्याहारे
(D) न कस्मिन्नपि

**6.** अक्षसूक्ते व्यवहृतस्य छन्दोद्वयस्य नाम किम्?
(A) त्रिष्टुप्-जगती
(B) गायत्री-जगती
(C) अनुष्टुप्-वृहती
(D) उष्णिक्-अनुष्टुप्

**7.** "रूपरहितस्पर्शवान् ______" अत्र रिक्तस्थाने किं पदं भवति?
(A) वायुः
(B) आकाशम्
(C) कालः
(D) न किमपि

**8.** ब्रह्मस्फुटसिद्धान्तस्य रचयिता कः?
(A) नागार्जुनः
(B) वराहमिहिरः
(C) ब्रह्मगुप्तः
(D) न कोऽपि

**9.** भारतीयनिर्वाचनव्यवस्थां प्रति कटाक्षरूपेण सिद्धेश्वर-चट्टोपाध्यायरचितं नाटकं किम्?
(A) धरित्रीपतिनिर्वाचनम्
(B) स्वर्गीयहसनम्
(C) अथ किम्
(D) न किमपि

**10.** माहेश्वरसूत्रस्थित-इत्वर्णानां नाम किम्?
(A) सूत्रम्
(B) अनुबन्धः
(C) प्रत्याहारः
(D) न किमपि

**11.** 'जगती' इति छन्दसि कति अक्षराणि वर्तन्ते?
(A) चतुर्विंशतिः
(B) षट्त्रिंशत्
(C) द्वात्रिंशत्
(D) अष्टचत्वारिंशत्

**12.** मनुसंहितानुसारं क्रोधजव्यसनस्य विभागाः कति?
(A) सप्त
(B) अष्टौ
(C) दश
(D) एकादश

Adda247 GET IT ON Google Play

**13.** 'भूतचतुष्टयवादः' कस्मिन् दर्शने स्वीक्रियते?

(A) जैनदर्शने

(B) योगदर्शने

(C) बौद्धदर्शने

(D) चार्वाकदर्शने

**14.** 'तर्कसंग्रहः' इत्यत्र 'तर्क'-पदेन किं बुध्यते?

(A) द्रव्यादिसप्तपदार्थाः

(B) पृथिव्यादिनवद्रव्याणि

(C) रूपरसादिचतुर्विंशतिर्गुणाः

(D) न किमपि

**15.** मुखं चन्द्र इव भाति—अत्र किम् अलंकारः भवति?

(A) रूपकम्

(B) उत्प्रेक्षा

(C) उपमा

(D) न किमपि

**16.** प्रातः + आशः —अत्र सन्धिबद्धं रूपं किम्?

(A) प्रातराशः

(B) प्रातःराशः

(C) प्रातोराशः

(D) न किमपि

**17.** 'सह'योगेन का विभक्तिः भवति?

(A) प्रथमा

(B) द्वितीया

(C) तृतीया

(D) चतुर्थी

**18.** ''अन्यपदार्थप्रधानो _____'' अत्र रिक्तस्थाने किं पदं विधीयते?

(A) बहुव्रीहिः

(B) द्वन्द्वः

(C) तत्पुरुषः

(D) अव्ययीभावः

**19.** वि- जि धातुः भवति

(A) परस्मैपदी

(B) आत्मनेपदी

(C) उभयपदी

(D) न किमपि

**20.** पा + सन् + लट् + ति इत्यत्र रूपं भवति

(A) पिपासति

(B) पिपासते

(C) पेपीयते

(D) न किमपि

**21.** ''म्रभ्नैर्याणां त्रयेण ...'' इत्यनेन निर्देशिताः गणाः भवन्ति

(A) म र य य य

(B) म भ न य य

(C) म र भ न य य य

(D) म र भ न य

**22.** तर्कसंग्रहानुसारं सुखाद्युपलब्धिसाधनमिन्द्रियं किम्?

(A) आकाशम्

(B) मनः

(C) तेजः

(D) न किमपि

**23.** ऋग्वेदे कति मण्डलानि वर्तन्ते?

(A) अष्टौ

(B) सप्त

(C) दश

(D) नव

**24.** विश्वनाथविरचितग्रन्थस्य नाम किम्?

(A) काव्यादर्शः

(B) नाट्यशास्त्रम्

(C) साहित्यदर्पणः

(D) न किमपि

Adda247 GET IT ON Google Play

**25.** यदा विशेषेण सामान्यं समर्थ्यते तदा किम् अलंकारः भवति?

(A) अर्थान्तरन्यासः

(B) काव्यलिङ्गम्

(C) कारणमाला

(D) न किमपि

**26.** अधोलिखितेषु विप्रकर्षस्य उदाहरणं किम्?

(A) वाराणसी > वेणारसी

(B) पृथ्वी > पृथिवी

(C) पक्व > पक्क

(D) न किमपि

**27.** पलान्नम्—अत्र कः समासः विधीयते?

(A) द्वन्द्वः

(B) मध्यपदलोपी कर्मधारयः

(C) अव्ययीभावः

(D) न कोऽपि

**28.** पर्वतेषु हिमालयः उच्चतमः —अत्र 'हिमालयः' इति पदे भवति

(A) निर्धारणे सप्तमी

(B) निर्धारणे षष्ठी

(C) कर्तरि प्रथमा

(D) कर्मणि प्रथमा

**29.** 'इक्' इति प्रत्याहारे कः वर्णवर्गः वर्तते?

(A) इ उ ऋ ऌ

(B) इ उ ऌ क

(C) अ इ उ क

(D) न कोऽपि

**30.** अस् + लोट् + हि = निष्पन्नरूपं किम्?

(A) असि

(B) अस्तु

(C) एधि

(D) न किमपि

**31.** महाभारतस्य खिलपर्वणः नाम किम्?

(A) हरिवंशः

(B) पुरुवंशः

(C) सगरवंशः

(D) न किमपि

**32.** विशाखदत्तरचिते मुद्राराक्षसे एकमेव नारीचरित्रं कस्य स्त्री आसीत्?

(A) राक्षसस्य स्त्री

(B) शकटदासस्य स्त्री

(C) सिद्धार्थकस्य स्त्री

(D) न कस्यापि

**33.** भारतीय-आर्यभाषायाः कति स्तराः वर्तन्ते?

(A) पञ्च

(B) त्रयः

(C) चत्वारः

(D) सप्त

**34.** 'त्वा' इति रूपं 'युष्मद्'शब्दरूपस्य कुत्र प्राप्यते?

(A) षष्ठीविभक्तेः एकवचने

(B) चतुर्थीविभक्तेः एकवचने

(C) द्वितीयाविभक्तेः एकवचने

(D) न कुत्रापि

**35.** 'इ'-वर्णस्य उच्चारणस्थानं किम्?

(A) तालु

(B) कण्ठः

(C) मूर्धा

(D) न किमपि

**36.** भृ + क्यप् = अत्र निष्पन्नरूपं भवति

(A) भार्य्य

(B) भृत्य

(C) भय

(D) न किमपि

Adda247 GET IT ON Google Play

**37.** ''कस्मै देवाय हविषा विधेम''—कस्मिन् सूक्ते अस्ति एष मन्त्रांशः?

(A) अक्षसूक्ते

(B) संज्ञानसूक्ते

(C) हिरण्यगर्भसूक्ते

(D) न कस्मिन्नपि

**38.** ''न जाने भोक्तारं कमिह समुपस्थास्यति विधिः''—अत्र वक्ता कः?

(A) दुष्यन्तः

(B) कण्वः

(C) माधव्यः

(D) न कोऽपि

**39.** 'किरातार्जुनीयम्' इति महाकाव्यस्य उत्सः किम्?

(A) महाभारतम्

(B) रामायणम्

(C) विष्णुपुराणम्

(D) न किमपि

**40.** ''यस्य प्रसादे ______ श्रीर्विजयश्च पराक्रमे''—अत्र रिक्तस्थाने किं पदं वर्तते?

(A) लक्ष्मीः

(B) वसति

(C) पद्मा

(D) न किमपि

**41.** कौटिल्यमतानुसारं नयापनयौ कस्यां विद्यायां वर्तते?

(A) वार्तायाम्

(B) दण्डनीत्याम्

(C) त्रय्याम्

(D) न कस्यामपि

**42.** ''घटः पटो न''—अत्र अभावस्य नाम किम्?

(A) प्रागभावः

(B) अन्योन्याभावः

(C) अत्यन्ताभावः

(D) प्रध्वंसाभावः

**43.** वसन्ततिलकछन्दसि प्रतिपादं कुत्र यतिः भवति?

(A) पादान्ते

(B) चतुर्थे अक्षरे

(C) सप्तमे अक्षरे

(D) न कुत्रापि

**44.** अधोलिखितेषु संवादसूक्तं किम्?

(A) अक्षसूक्तम्

(B) देवीसूक्तम्

(C) यमयमीसूक्तम्

(D) न किमपि

**45.** ''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन''—गीतायाः कुत्र उपलभ्यते इयमुक्तिः?

(A) विश्वरूपदर्शनयोगे

(B) सांख्ययोगे

(C) ज्ञानयोगे

(D) कर्मयोगे

**46.** अष्टाङ्गिकयोगानुष्ठानस्य आवश्यकता कस्मिन् दर्शने स्वीक्रियते?

(A) बौद्धदर्शने

(B) मीमांसादर्शने

(C) योगदर्शने

(D) न कस्मिन्नपि

**47.** ''सत्यमेव जयते'' इति उक्तिः कस्याम् उपनिषदि उपलभ्यते?

(A) ईशोपनिषदि

(B) प्रश्नोपनिषदि

(C) माण्डूक्योपनिषदि

(D) मुण्डकोपनिषदि

**48.** महाभारते कति पर्वाणि सन्ति?

(A) सप्त

(B) एकादश

(C) अष्टादश

(D) विंशतिः

**49.** 'राजतरङ्गिणी' इति ऐतिहासिककाव्यं केन राज्येन सह सम्बद्धम्?
(A) कर्णाटकराज्येन
(B) गुजराटराज्येन
(C) काश्मीरराज्येन
(D) न केनापि राज्येन

**50.** श्लेषालंकारस्य कति विभागाः वर्तन्ते?
(A) अष्ट
(B) दश
(C) सप्त
(D) पञ्च

**51.** दुर्गा > दुग्गा इत्यत्र ध्वनिपरिवर्तनस्य नाम किम्?
(A) विषमीभवनम्
(B) समीभवनम्
(C) आगमः
(D) न किमपि

**52.** ''ञमङणनानां _____ च'' अत्र रिक्तस्थाने किं पदं सम्बद्धम्?
(A) नासिका
(B) मूर्धा
(C) तालु
(D) न किमपि

**53.** 'अभिज्ञानशकुन्तलम्' इति नाटकस्य प्रारम्भे कः देवः स्तुतः भवति?
(A) ब्रह्मा
(B) विष्णुः
(C) शिवः
(D) न कोऽपि

**54.** व्याघ्रभयम् इति समासबद्धपदे उपसर्जनं किम्?
(A) व्याघ्र
(B) भयम्
(C) व्याघ्रभयम्
(D) न किमपि

**55.** अधोलिखितेषु किं सूत्रं वैदिकस्वरसम्बद्धम्?
(A) उच्चैरुदात्तः
(B) अदेङ् गुणः
(C) हलन्त्यम्
(D) न किमपि

**56.** वीरवरः कः आसीत्?
(A) वणिक्पुत्र
(B) राजपुत्रः
(C) सचिवः
(D) न कोऽपि

**57.** शाकलशाखानुसारमृग्वेदे कति सूक्तानि विद्यन्ते?
(A) सप्तदशाधिकं सहस्रम्
(B) अष्टाविंशत्यधिकं सहस्रम्
(C) विंशत्यधिकं सहस्रम्
(D) सहस्रम्

**58.** आर्यभट्टः कः आसीत्?
(A) चिकित्सकः
(B) ज्योतिर्विज्ञानी
(C) सङ्गीतज्ञः
(D) न कोऽपि

**59.** 'इको यणचि' इति सूत्रे कति प्रत्याहाराः वर्तन्ते?
(A) द्वौ
(B) चत्वारः
(C) त्रयः
(D) पञ्च

**60.** ''अहं त्वां तृणाय न मन्ये'' इत्यत्र 'तृणाय' इति पदे भवति
(A) कर्मणि चतुर्थी
(B) कर्मणि द्वितीया
(C) सम्प्रदाने चतुर्थी
(D) न किमपि

Adda247 GET IT ON Google Play

**61.** ''अतिस्नेहः पापशङ्की''—'अभिज्ञानशकुन्तलम्' इति नाटकस्य कुत्र वर्तते इयमुक्तिः?

(A) तृतीये अङ्के

(B) चतुर्थे अङ्के

(C) प्रथमे अङ्के

(D) सप्तमे अङ्के

**62.** एकाक्षरसम्पन्नगणद्वयस्य नाम

(A) र ज

(B) म न

(C) ल ग

(D) य भ

**63.** अधोलिखितेषु दार्शनिकसूक्तं किम्?

(A) अक्षसूक्तम्

(B) सरमापणिसंवादसूक्तम्

(C) हिरण्यगर्भसूक्तम्

(D) न किमपि

**64.** वराहमिहिरविरचिते 'बृहत्संहिता' इति ग्रन्थे कति अध्यायाः वर्तन्ते?

(A) षडधिकं शतम्

(B) दशाधिकं शतम्

(C) नवतिः

(D) पञ्चनवतिः

**65.** 'इ' इति वर्णस्य गुणे किं रूपं भवति?

(A) ए

(B) उ

(C) अव्

(D) न किमपि

**66.** ''कर्तुरीप्सिततमं ______'' अत्र रिक्तस्थाने किं पदं भवति?

(A) करणम्

(B) अपादानम्

(C) कर्म

(D) न किमपि

**67.** अभिज्ञानशकुन्तले नाटके दीर्घापाङ्गः कः आसीत्?

(A) मृगशिशुः

(B) सिंहशिशुः

(C) गजशिशुः

(D) न कोऽपि

**68.** ''उपेन्द्रवज्रा प्रथमे लघौ सा''—अत्र 'सा'-पदेन निर्देशितछन्दसः नाम

(A) शालिनी

(B) उपेन्द्रवज्रा

(C) मालिनी

(D) इन्द्रवज्रा

**69.** ऋग्वेदे ऐक्यवन्दनाविषयकसूक्तस्य नाम किम्?

(A) देवीसूक्तम्

(B) संज्ञानसूक्तम्

(C) पुरुषसूक्तम्

(D) न किमपि

**70.** 'लौहशास्त्रम्' केन विरचितम्?

(A) वराहमिहिरेण

(B) नागार्जुनेन

(C) जीवकेन

(D) न केनापि

**71.** यत्र वाक्यस्य अर्थः पदस्य अर्थः वा कस्यापि कार्यस्य हेतुः भवति, तत्र किम् अलंकारः भविष्यति?

(A) उल्लेखः

(B) उपमा

(C) काव्यलिङ्गम्

(D) न किमपि

**72.** विद्वस्-शब्दस्य सप्तमीविभक्तौ एकवचने रूपं किम्?

(A) विदुषि

(B) विदुषी

(C) विदुषे

(D) न किमपि

Adda247 GET IT ON Google Play

**73.** शिशोः शयनम्—अत्र 'शिशोः'-पदे भवति

(A) कर्तरि षष्ठी

(B) कर्मणि षष्ठी

(C) सम्बन्धे षष्ठी

(D) न किमपि

**74.** दुष्यन्त-शकुन्तलयोः पुनर्मिलनं कुत्र अभवत्?

(A) कण्वाश्रमे

(B) सोमतीर्थे

(C) मारीचाश्रमे

(D) न कुत्रापि

**75.** मन्दाक्रान्ताछन्दसि प्रतिपादं कति अक्षराणि सन्ति?

(A) चतुर्दश

(B) पञ्चदश

(C) विंशतिः

(D) सप्तदश

**76.** गोपथब्राह्मणं केन वेदेन सम्बद्धम्?

(A) अथर्ववेदेन

(B) यजुर्वेदेन

(C) सामवेदेन

(D) न केनापि

**77.** काश्मीरसमस्याम् अवलम्ब्य श्रीजीवन्यायतीर्थरचितस्य रूपकस्य नाम किम्?

(A) सिन्धुसौवीरसंग्रामम्

(B) साम्यसागरकल्लोलम्

(C) स्वातन्त्र्यसन्धिक्षणम्

(D) भट्टसंकटम्

**78.** "_____ विना हेतुं कार्योत्पत्तिर्यदुच्यते"—अत्र रिक्तस्थाने किं पदं भवति?

(A) विशेषोक्तिः

(B) विभावना

(C) एकावली

(D) न किमपि

**79.** सम्प्रसारणे यू-वर्णस्य किं रूपं भवति?

(A) उ

(B) ए

(C) इ

(D) न किमपि

**80.** नर-शब्दस्य तृतीयाविभक्तेः एकवचने रूपं भवति

(A) नरेन

(B) नरेण

(C) नरैः

(D) न किमपि

**81.** अधोलिखितेषु इतरेतरद्वन्द्वसमासस्य उदाहरणं किम्?

(A) मातापितरौ

(B) अहिनकुलम्

(C) महाराजः

(D) न किमपि

**82.** भारविः कस्मिन् गुणे निपुणः आसीत्?

(A) पदलालित्ये

(B) अर्थगौरवे

(C) उपमाप्रयोगे

(D) न कस्मिन्नपि

**83.** 'चतुर्णां पण्डितमूर्खाणां कथा' इत्यस्य उत्सः किम्?

(A) हितोपदेशः

(B) पुरुषपरीक्षा

(C) पञ्चतन्त्रम्

(D) न किमपि

**84.** वैदिकक्रियाकाण्डस्य यथायथकालनिर्धारणार्थं कस्य वेदाङ्गस्य ज्ञानम् आवश्यकम्?

(A) निरुक्तस्य

(B) कल्पस्य

(C) शिक्षायाः

(D) ज्योतिषस्य

**85.** 'सोमप्रभम्' इति नाटकस्य रचयिता कः?

(A) रमाचौधुरी

(B) श्रीजीवन्यायतीर्थः

(C) राधावल्लभत्रिपाठी

(D) न कोऽपि

**86.** परि + ईक्षा = अत्र सन्धिबद्धरूपं किम्?

(A) परिक्षा

(B) परीक्षा

(C) परीख्या

(D) न किमपि

**87.** ''सप्तानां शतानां समाहारः'' इति विग्रहवाक्यस्य समासबद्धरूपं किम्?

(A) सप्तशती

(B) सप्तशतिः

(C) सप्तशतम्

(D) न किमपि

**88.** किरातार्जुनीये महाकाव्ये कः आसीत् वृकोदरः?

(A) अर्जुनः

(B) नकुलः

(C) सहदेवः

(D) भीमः

**89.** ''पराभवोऽप्युत्सव एव मानिनाम्''—उक्तिरियम्

(A) युधिष्ठिरस्य

(B) वनेचरस्य

(C) द्रौपद्याः

(D) अर्जुनस्य

**90.** ''क्लैब्यं मास्म गमः''—केन उक्तमिदम्?

(A) श्रीकृष्णेन

(B) अर्जुनेन

(C) सञ्जयेन

(D) न केनापि

**91.** 'रत्नावली' इति नाटिकायां नायिकायाः छद्मनाम किम्?

(A) वासवदत्ता

(B) प्रियदर्शिका

(C) सागरिका

(D) न किमपि

**92.** काव्यप्रकाशस्य रचयिता कः?

(A) भरतः

(B) मम्मटः

(C) दण्डी

(D) न कोऽपि

**93.** अयमेति मन्दं मन्दं कावेरीवारिपावनः पवनः — इत्यत्र अलंकारः किम्?

(A) यमकम्

(B) अनुप्रासः

(C) उपमा

(D) न किमपि

**94.** 'राजन्'-शब्दे 'अन्'-अंशस्य नाम किम्?

(A) उपधा

(B) इत्

(C) टि

(D) न किमपि

**95.** ''पुत्रम् इव आचरति'' इति वाक्यात् निष्पन्नपदं भवति

(A) पुत्रायते

(B) पुत्रीयते

(C) पुत्रीयति

(D) न किमपि

**96.** मनुसंहितानुसारं कः असृजत् दण्डम्?

(A) मनुः

(B) ईश्वरः

(C) यमः

(D) न कोऽपि



Adda247

**97.** ''देवि! न मे राज्येन जीवितेन वा प्रयोजनमस्ति''—अत्र वक्ता कः?

(A) शूद्रकः

(B) वीरवरः

(C) शक्तिधरः

(D) न कोऽपि

**98.** कृष्ण-शुक्लशाखाद्वयं केन वेदेन सम्बद्धम्?

(A) सामवेदेन

(B) यजुर्वेदेन

(C) अथर्ववेदेन

(D) न केनापि

**99.** ''लोको विद्या प्रकीर्णं च काव्याङ्गानि''—अधोलिखितानां कस्मिन् ग्रन्थे प्राप्यते सूत्रमिदम्?

(A) काव्यादर्शे

(B) साहित्यदर्पणे

(C) काव्यालंकारसूत्रवृत्तौ

(D) न कस्मिन्नपि

**100.** गम्-धातोः लिट्लकारे प्रथमपुरुषस्य एकवचने रूपं किम्?

(A) जगाम

(B) जगमिथ

(C) जग्म

(D) न किमपि

**101.** प्र-वह्-धातुः अधोलिखितेषु किं भवति?

(A) उभयपदी

(B) आत्मनेपदी

(C) परस्मैपदी

(D) न किमपि

**102.** मनुसंहितानुसारं कुवेरः कथं धनैश्वर्यं प्राप्तवान्?

(A) क्रोधात्

(B) विनयात्

(C) पराक्रमात्

(D) अविनयात्

**103.** 'निर्वाणः' इति अभिमतः कस्मिन् भारतीयदर्शने प्राप्यते?

(A) बौद्धदर्शने

(B) जैनदर्शने

(C) वेदान्तदर्शने

(D) न कस्मिन्नपि

**104.** ''शिष्यस्तेऽहं शाधि माम्''—अत्र शिष्यः कः?

(A) कृष्णः

(B) युधिष्ठिरः

(C) अर्जुनः

(D) न कोऽपि

**105.** राजा शूद्रकः वीरवराय किं राज्यं ददौ?

(A) बिहारराज्यम्

(B) मगधराज्यम्

(C) कर्णाटराज्यम्

(D) न किमपि

**106.** ''सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः''—इयमुक्तिः कुत्र उपलभ्यते?

(A) चतुर्णां पण्डितमूर्खाणां कथायाम्

(B) वीरवरकथायाम्

(C) हासविद्यकथायाम्

(D) न कुत्रापि

**107.** श्रीमद्भगवद्गीतायाः उत्सः किम्?

(A) रामायणम्

(B) महाभारतम्

(C) किरातार्जुनीयम्

(D) न किमपि



Adda247

Adda247 GET IT ON Google Play

**108.** ब्रह्मसूत्रम् अवलम्ब्य शङ्कराचार्येन विरचितं भाष्यं किम्?

(A) शारीरिकभाष्यम्

(B) श्रीभाष्यम्

(C) आभासभाष्यम्

(D) न किमपि

**109.** रामायणस्य द्वितीयकाण्डस्य नाम किम्?

(A) बालकाण्डम्

(B) अयोध्याकाण्डम्

(C) लङ्काकाण्डम्

(D) न किमपि

**110.** भामहविरचिते काव्यालंकारे कति परिच्छेदाः वर्तन्ते?

(A) षट्

(B) दश

(C) नव

(D) सप्त

**111.** मुनी इमौ आश्रमे वसतः —अत्र प्रगृह्यं किम्?

(A) इमौ

(B) मुनी

(C) आश्रमे

(D) न किमपि

**112.** दिव्-शब्दस्य प्रथमाविभक्तेः एकवचने रूपं भवति

(A) दिवः

(B) दिवा

(C) द्यौः

(D) न किमपि

**113.** लक्ष्मी + मतुप् = अत्र निष्पन्नपदम्

(A) लक्ष्मीवान्

(B) लक्ष्मीमान्

(C) लक्षीवान्

(D) न किमपि

**114.** तव पाठ्यांशान्तर्गते अग्निसूक्ते व्यवहृतछन्दसः नाम किम्?

(A) जगती

(B) गायत्री

(C) वृहती

(D) न किमपि

**115.** "मार्गशीर्षे शुभे मासि यायाद् यात्रां महीपतिः"—अत्र 'मार्गशीर्ष'-पदेन कः मासः बुध्यते?

(A) फाल्गुनमासः

(B) चैत्रमासः

(C) अग्रहायणमासः

(D) वैशाखमासः

**116.** कौटिल्यः कस्य महामन्त्री आसीत्?

(A) प्रथमचन्द्रगुप्तस्य

(B) द्वितीयचन्द्रगुप्तस्य

(C) हर्षवर्धनस्य

(D) न कस्यापि

**117.** "अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्"—अत्र 'अविनाशि'-पदेन किं बुध्यते?

(A) जगत्

(B) आत्मा

(C) जीवः

(D) न किमपि

**118.** कः विशिष्टाद्वैतवादस्य प्रवक्ता?

(A) शङ्कराचार्यः

(B) गौतमः

(C) रामानुजः

(D) न कोऽपि

Adda247 GET IT ON Google Play

**119.** संस्कृतसाहित्ये कः आदिकविरूपेण विख्यातः?

(A) व्यासदेवः

(B) कालिदासः

(C) वाल्मीकिः

(D) न कोऽपि

**120.** भासविरचितेषु रूपकेषु वियोगान्तरूपकस्य नाम किम्?

(A) पञ्चरात्रम्

(B) ऊरुभङ्गम्

(C) स्वप्नवासवदत्तम्

(D) न किमपि

**121.** अधोलिखितेषु कः अनार्यशब्दः?

(A) अश्व

(B) व्याघ्र

(C) विडाल

(D) न कोऽपि

**122.** शी + लङ् + अन्त = निष्पन्नपदं किम्?

(A) अशेरत

(B) शेरते

(C) अशेत

(D) न किमपि

**123.** ''शयनात् प्राक् भगवन्तं स्मर''—अत्र अव्ययपदं किम्?

(A) शयनात्

(B) प्राक्

(C) भगवन्तम्

(D) स्मर

**124.** रामानुजेन ब्रह्मणः कः भेदः स्वीकृतः?

(A) स्वजातीयभेदः

(B) विजातीयभेदः

(C) स्वगतभेदः

(D) न कोऽपि

**125.** ''बालानां सुखबोधाय क्रियते तर्कसंग्रहः''—अत्र 'बाल'-शब्देन कीदृशः बालः बुध्यते?

(A) क्रीडानिपुणः बालः

(B) ग्रहणधारणपटुः बालः

(C) शास्त्रनिपुणः बालः

(D) न कोऽपि

**126.** ब्रह्मसूत्रस्य रचयिता कः?

(A) बादरायणः

(B) कपिलः

(C) शङ्कराचार्यः

(D) न कोऽपि

**127.** ''आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो _____'' अत्र रिक्तस्थाने किं पदं सम्बद्धम्?

(A) दण्डः

(B) लोकयात्रा

(C) नीतिः

(D) न किमपि

**128.** उप + एहि = अत्र सन्धिबद्धं पदम्

(A) उपैहि

(B) उपेहि

(C) उपएहि

(D) न किमपि

**129.** संज्ञानसूक्ते कति मन्त्राः सन्ति?

(A) दश

(B) सप्त

(C) चत्वारः

(D) त्रयः

**130.** ''साधारण एष दोषः''—अत्र वक्ता कः?

(A) भरद्वाजः

(B) विशालाक्षः

(C) पिशुनः

(D) पराशरः

Adda247 GET IT ON Google Play

**131.** जयदेवेन विरचितं गीतिकाव्यम्

(A) मेघदूतम्

(B) गीतगोविन्दम्

(C) नीतिशतकम्

(D) न किमपि

**132.** 'गाथासप्तशती' कया भाषया विरचिता?

(A) पालिभाषया

(B) प्राकृतभाषया

(C) वैदिकसंस्कृतभाषया

(D) न कयापि

**133.** मृ-धातोः लृट्-लकारे उत्तमपुरुषस्य एकवचने किं रूपं भवति?

(A) मरिष्यति

(B) म्रियते

(C) मरिष्यामि

(D) न किमपि

**134.** 'श्री'शब्दरूपान्तर्गतस्य 'श्रियाः' इति रूपस्य विकल्परूपं किम्?

(A) श्रियाम्

(B) श्रियः

(C) श्रियि

(D) न किमपि

**135.** अधोलिखितेषु कः पूरणवाचकः शब्दः?

(A) एकादशः

(B) पञ्चदश

(C) सप्ततिः

(D) न कोऽपि

**136.** नृत् + यङ् + लट् प्रथमपुरुषस्य एकवचने रूपं भवति

(A) नरीनृत्यति

(B) नरीनृत्यते

(C) निनर्तिषति

(D) न किमपि

**137.** "क्रोधाद्भवति ______" अत्र रिक्तस्थाने किं पदं वर्तते?

(A) बुद्धिनाशः

(B) स्मृतिविभ्रमः

(C) कामः

(D) सम्मोहः

**138.** अधोलिखितानां कस्मिन् नाटके वेदान्तदर्शनस्य तत्त्वं परिव्यक्तम्?

(A) मृच्छकटिके

(B) प्रबोधचन्द्रोदये

(C) मुद्राराक्षसे

(D) न कस्मिन्नपि

**139.** पञ्चमवेदरूपेण प्रसिद्धं किम्?

(A) पुराणम्

(B) रामायणम्

(C) महाभारतम्

(D) न किमपि

**140.** माघरचिते शिशुपालवधे महाकाव्ये नायकः कः?

(A) शिशुपालः

(B) श्रीकृष्णः

(C) बलरामः

(D) न कोऽपि

**141.** भी + लट् + अन्ति = अत्र निष्पन्नरूपं किम्?

(A) बिभेति

(B) बिभ्यन्ति

(C) बिभ्यति

(D) न किमपि

**142.** ऋग्वेदस्य कस्मिन् मण्डले वर्तते अक्षसूक्तम्?

(A) दशमे मण्डले

(B) प्रथमे मण्डले

(C) पञ्चमे मण्डले

(D) न कस्मिन्नपि

**143.** कौटिलीये अर्थशास्त्रे कति अध्यायाः वर्तन्ते?

(A) अशीत्यधिकं शतम्

(B) पञ्चाशदधिकं शतम्

(C) विंशत्यधिकं शतम्

(D) दशाधिकं शतम्

**144.** महान् + आग्रहः = अत्र सन्धिबद्धं रूपं किम्?

(A) महानाग्रहः

(B) महान्नाग्रहः

(C) महाग्रहः

(D) न किमपि

**145.** 'पूर्वेभिः' इति प्रयोगः अधोलिखितेषु कुत्र प्राप्यते?

(A) लौकिकसंस्कृते

(B) वैदिकसंस्कृते

(C) पालिभाषायाम्

(D) न कुत्रापि

**146.** श्रीमत् + ङीप् = अत्र निष्पन्नरूपं किम्?

(A) श्रीमतिः

(B) श्रीमती

(C) श्रीयुक्ता

(D) न किमपि

**147.** ''मन्त्रपूर्वाः सर्वारम्भाः''—कुत्र प्राप्यते वाक्यमिदम्?

(A) अभिज्ञानशकुन्तले

(B) किरातार्जुनीये

(C) कौटिलीये अर्थशास्त्रे

(D) न कुत्रापि

**148.** पातञ्जलयोगसूत्रस्य प्रथमपादः किम्?

(A) विभूतिपादः

(B) समाधिपादः

(C) साधनपादः

(D) कैवल्यपादः

**149.** ''स गृहं गमिष्यति।'' वाक्यमिदं कस्मिन् वाच्ये व्यक्तम्?

(A) कर्मवाच्ये

(B) भाववाच्ये

(C) कर्तृवाच्ये

(D) कर्मकर्तृवाच्ये

**150.** ''विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः''—अस्य अभिमतस्य प्रवक्ता कः?

(A) विश्वनाथः

(B) भरतः

(C) कुन्तकः

(D) न कोऽपि

Adda247
GET IT ON Google Play

SPACE FOR ROUGH WORK

Adda247

★ ★ ★

Adda247 GET IT ON Google Play

**READ THE FOLLOWING INSTRUCTIONS CAREFULLY :**

**নিম্নলিখিত নির্দেশাবলী ভালো করে পড়ুন :**

1. Out of the four alternatives for each question, only one circle for the correct answer is to be darkened completely with Black Ballpoint Pen on the OMR Answer Sheet. The answer once marked is not liable to be changed.
প্রতিটি প্রশ্নের উত্তর হিসাবে যে চারটি বিকল্প দেওয়া আছে তা থেকে শুধুমাত্র শুদ্ধ উত্তরটির প্রেক্ষিতে OMR উত্তরপত্রে দেওয়া বৃত্তটি কালো বলপয়েন্ট কলম দ্বারা সম্পূর্ণরূপে কালো করে চিহ্নিত করতে হবে। একবার উত্তর চিহ্নিত করা হয়ে গেলে তাকে আর পরিবর্তন করা যাবে না।
2. The candidates should ensure that the Answer Sheet is not folded. Do not make any stray marks on the Answer Sheet. Do not write your Roll No. anywhere else except at the specified space on the OMR Answer Sheet.
পরীক্ষার্থীরা কোনোভাবেই OMR উত্তরপত্রটি ভাঁজ করবেন না। OMR উত্তরপত্রে কোনোরকম দাগ কাটা বা মন্তব্য লেখা যাবে না। পরীক্ষার্থীরা তাঁদের রোল নাম্বার উত্তরপত্রে নির্দিষ্ট করা জায়গা ছাড়া অন্য কোনো জায়গায় লিখবেন না।
3. Handle the Question Booklet and Answer Sheet with utmost care, as under no circumstances (except technical defect), another set of Question Booklet and OMR Answer Sheet will be provided.
OMR উত্তরপত্র এবং প্রশ্নপত্রের ব্যবহারে সার্বিক সতর্কতা অবলম্বন করতে হবে। কোনো অবস্থাতেই (মুদ্রণ ত্রুটি ও পদ্ধতিগত ত্রুটি ছাড়া) OMR উত্তরপত্র ও প্রশ্নপত্র পাল্টে দেওয়া যাবে না।
4. The candidates will write the correct Question Booklet Number and OMR Answer Sheet Number in the Attendance Sheet.
পরীক্ষার্থীকে অ্যাটেন্ডেন্স শীট-এ তাঁর OMR উত্তরপত্রের নাম্বার এবং প্রশ্নপত্রের নাম্বার নির্ভুলভাবে লিখতে হবে।
5. Candidates are not allowed to carry any textual material, printed or written, bits of papers, pager, mobile phone, electronic devices or any other material except the Admit Card and Photo Identity Card inside the Examination Hall/Room.
পরীক্ষার্থীকে অ্যাডমিট কার্ড এবং ফটো আইডেনটিটি কার্ড ছাড়া অন্য কোনো ছাপানো বা লেখা কাগজ, পঠন ও মুদ্রণজাত সামগ্রী, পেজার, মোবাইল ফোন, অন্য কোনোরকম ইলেক্ট্রনিক ডিভাইস নিয়ে পরীক্ষা হলে/কক্ষে প্রবেশ করতে দেওয়া হবে না।
6. Each candidate must show on demand his/her Admit Card and Photo Identity Card to the Invigilator/Examination Officials.
পরীক্ষা হলে ইনভিজিলেটর কর্তৃক কিংবা পরীক্ষা কেন্দ্রের ভিতরে পরীক্ষা-সংশ্লিষ্ট আধিকারিক কর্তৃক দাবি করা হলে প্রত্যেক পরীক্ষার্থী তাঁর অ্যাডমিট কার্ড ও ফটো আইডেনটিটি কার্ড দেখাতে বাধ্য থাকবেন।
7. No candidate, without special permission of the Centre Superintendent or Invigilator, should change his/her seat.
সেন্টার সুপারিনটেনডেন্ট বা ইনভিজিলেটর-এর বিশেষ অনুমতি ছাড়া পরীক্ষার্থী পরীক্ষা হলে তাঁর বসার স্থান পরিবর্তন করতে পারবেন না।
8. Candidates will have to sign twice in the Attendance Sheet presented by the Invigilator on duty; first after taking their seats in the Examination Hall/Room and second at the time of handing over their OMR Answer Sheet to the Invigilator.
পরীক্ষার্থীদিগকে ইনভিজিলেটরের দেওয়া অ্যাটেন্ডেন্স শীট-এ দুইবার স্বাক্ষর করতে হবে, প্রথমবার পরীক্ষা হলে তাঁদের আসন গ্রহণের পর এবং দ্বিতীয়বার ইনভিজিলেটরের নিকট OMR উত্তরপত্র জমা দেওয়ার সময়ে।
9. The candidates should not leave the Examination Hall/Room without handing over their OMR Answer Sheet to the Invigilator on duty and without signing the Attendance Sheet twice. Cases where a candidate has not signed the Attendance Sheet a second time will be deemed not to have handed over the Answer Sheet and dealt with as an unfair means case.
অ্যাটেন্ডেন্স শীট-এ দুইবার স্বাক্ষর করা এবং কর্তব্যরত ইনভিজিলেটর-এর নিকট উত্তরপত্র জমা দেওয়া ব্যতীত কোনো পরীক্ষার্থী পরীক্ষা হল ত্যাগ করতে পারবেন না। যদি কোনো পরীক্ষার্থী অ্যাটেন্ডেন্স শীট-এ দুইবার স্বাক্ষর না করেন তবে তিনি তাঁর OMR উত্তরপত্র জমা করেননি বলে গণ্য হবে এবং তা অনুচিত কার্য হিসাবে ধরা হবে।
10. Use of any type of calculating device is prohibited.
যে কোনো ধরনের ক্যালকুলেটরের ব্যবহার সম্পূর্ণরূপে নিষিদ্ধ।
11. The candidates are governed by all the rules and regulations of the Board with regard to their conduct in the Examination Hall/Room. All cases of unfair means will be dealt with as per rules and regulations of the Board.
পরীক্ষা হল/কক্ষের মধ্যে পরীক্ষার্থীর আচরণ বোর্ডের নিয়ম ও নির্দেশিকা অনুযায়ী চালিত হবে। সব ধরনের অনুচিত কার্য বোর্ডের নিয়ম ও নির্দেশিকা অনুযায়ী নির্দিষ্ট হবে।
12. No part of the Question Booklet and OMR Answer Sheet shall be detached under any circumstances.
কোনো অবস্থাতেই প্রশ্নপত্র এবং OMR উত্তরপত্রের কোনো অংশ ছেঁড়া বা আলাদা করা যাবে না।
13. On completion of the test, the candidate must hand over the OMR Answer Sheet to the Invigilator in the Hall/Room. The candidates are allowed to take away the Question Booklet with them.
পরীক্ষা শেষ হওয়ার পরে পরীক্ষার্থী অবশ্যই তাঁর OMR উত্তরপত্র কর্তব্যরত ইনভিজিলেটরের কাছে জমা দেবেন। পরীক্ষার্থীরা প্রশ্নপত্রটি তাঁদের সাথে নিয়ে যেতে পারেন।